National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(58): 225-227
© 2025 NJHSR
www.sanskritarticle.com

**सौरभ सरदारः**
शोधछात्रः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**सौरभ सरदारः**
शोधछात्रः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# बाल्मीकिरामायणे प्रतिपादिता सामाजिकसमरूपता

**सौरभ सरदारः**

❖ **भूमिका –**

संस्कृतसाहित्यस्य आदिकविना बाल्मीकिना विरचितं रामायणमेकं वटवृक्षसदृशम्। यस्य शीतलच्छायायां मानवसमाजः सुशोभितो भवति। रामायणमस्ति महाकाव्यमपितु उत्तरवर्त्तिनां काव्याणाम् उपजीव्यकाव्यम्। रामायणमिदं भारतीयसमाजे महाकाव्यापेक्षया धार्मिकग्रन्थरूपेणाधिकं प्रसिद्धमस्ति। भारते सदैव रामराज्यस्य सामाजिकस्य राजनैतिकादर्शस्य च कल्पना कृता अस्ति। परन्तु रामराज्यमिदं कीदृशम् आसीत् ? कथम् अद्यापि अस्ति तस्य गौरवस्थानम् ? एतस्य प्रश्नस्य उत्तरप्राप्तै तद्युगस्य ऐतिहासिक-सामाजिक-राजनैतिकादीनाम् अध्ययणम् आवश्यकमेव। ऐतिहासिकदृष्ट्या बारतीयेतिहासः युगे युगे वैदिकयुगेन सह आधुनिकयुगस्य सम्बन्धस्थापनं करोति। रामायणस्य काले सर्वस्मिन् भारते आर्यसभ्यतायाः संस्कृत्याः च प्रभावो नास्ति। परन्तु उत्तरभारते आर्यसभ्यतायाः प्रभावोऽस्ति तथा च दक्षिणभारते अनार्यसभ्यता विद्यमाना अस्ति। वस्तुतः युगमिदं द्वयोः सभ्यतयोः प्रतिस्पर्द्धाया युगम्। रामायणकाले समाजोऽस्ति वर्णाश्रमधर्मव्यवस्थाश्रितः। वर्णचतुष्टयेन समाजो विभक्त आसीत्। वर्णचतुष्टयस्य स्वाधिकारः स्वकर्तव्यश्चासीत्। रामायणकाले समाजे आश्रमचतुष्टमासीत्। तानि यथा – ब्रह्मचर्यं, गृहस्थः, वानप्रस्थः सन्न्यासश्चेति। रामायणकालस्य समाजे परिवारस्य गुरुत्वपूर्णस्थानम् आसीत्। समाजे पारिवारिकरीतिनां समादर आसीत्। आदिकविना बाल्मीकिना रामायणे उपस्थापितं रामस्य आदर्शजीवनचरितं सर्वेषां कृते अनुकरणीयम्, अपितु चिरस्मरणीयम्। रामायणकाले राजानः प्रजान् प्रति यत्नवन्तः आसन्। आर्य-वानर-राक्षसादयो राजानोऽपि जनमतेन स्वकर्मणः नियन्त्रणं कुर्वन्ति। अतो राजानं प्रति प्रजाणां को विचार आसीत् ? विषयेऽस्मिन् राज्ञां सचेतनता आसीत्। राम इव राजापि यः प्रभूतः शक्तिशाली तथापि लोकनिन्दावमाननाया भयेन निर्दोषायाः सीतायाः परित्यागं कृतवान्। अतो वक्तुं शक्यते – समाजव्यवस्थाया मूले राजा आसीत्। तेषां कर्तव्य आसीत् स्वराज्ये ईदृशाया व्यवस्थायाः स्थापनं यया प्रजाणां इहलौकिकः पारलौकिकश्चेति विकाशो भवति। समाजस्य उच्च-नीम्नवर्गाणां मध्ये रामायणस्य प्रभूतप्रभावो अस्ति। अतो रामायणेन सह इतराणां साहित्यानां धार्मिकग्रन्थानां वा तुलना न कर्तुं शक्यते। अनेन ग्रन्थेन एव मानवहृदये रामराज्यस्य अतुलनीया कल्पना अङ्किता।

रामायणस्य रचनाकालविषये अनेकाः विवादाः सन्ति। रामायणस्य विषये विदुषाम् ऐक्यमत्यं नास्ति। परन्तु निर्विवादेन वक्तुं शक्यते – रामायणे यस्य युगस्य वर्णना अस्ति तद्युगं अनेकं प्राचीणम्। पुराणविशेषज्ञस्य F.C. Pargister इत्यस्य मते महाभारतस्य युद्धम् आनुमानिके ९५० ख्रि. पूर्वाब्दे अभवत्। यदि रामायण-महाभारतोभयोर्युद्धयोर्मध्ये आनुमानिकायाः पञ्चशताब्द्याः व्यवधानाम् अस्ति, तर्हि रामायणे यस्य युगस्य वर्णना कृता अस्ति, तद्युगं १५०० ख्रि. पूर्वाब्दस्य। रामायणस्य रचनाकालो निःसन्देहेन विवादस्य विषयः। परन्तु निर्विवादेन वक्तुं शक्यते रामायणस्य युगं भारतीयेतिहासस्य महत्वपूर्णमेकं युगम् आसीत्। न केवलम् ऐतिहासिकदृष्ट्या अपितु राजनैतिक-सांस्कृतिकदृष्ट्यापि युगस्यास्य विशेषमहत्वम् आसीत्।

❖ **समाजस्य अर्थः –**

मानव एकः सामाजिकः प्राणी। आत्मरक्षायै ते एकत्र वसन्ति। अनया प्रवृत्त्या समाजस्य प्रारम्भो भवति। यत्र विभिन्नाः सदस्याः स्वाधिकारेण सह इतरेषां सदस्यानाम् अधिकाराणां सम्मानं कृतवन्तः। सहजेन 'समाज'स्य अर्थः – मानवसमुदायार्थं कृतोऽस्ति। विभिन्नाः विद्वांसः समाजस्य अर्थविषये विभिन्नानि मतानि प्रदत्तानि। कोऽपि अस्यार्थो मानवसमूहरूपेण कृतः, कोऽपि समितिरूपेण कृतः, कोऽपि च संस्थारूपेण कृतोऽस्ति। अनेन कारणेन समाजस्य अर्थ निश्चितरूपेण प्राप्तुं न शक्यते। विभिन्नाः समाजवैज्ञानिकाः समाजशब्दस्य अर्थं स्वानुसारेण प्रदत्तवन्तः। उदाहरणरूपेण – राजनीतिशास्त्रेण समाजो व्यक्तिनां समूहो, मानसशास्त्रेण आदिमसमुदायो हि समाज इति उच्यते। यद्यपि क्रियासम्पन्नकारीनां जनानां समूहः समाज इति उच्यते। जार्जसिमल इत्यस्य मतानुसारेण – "समाजः अन्तक्रियया सम्बन्धितानां मानवानां समूहः।"

राल्फ-लिन्टन इत्यस्यमतानुसारेण – "समाजोऽस्ति ईदृशः समूहो यत्र मानवाः सम्मिलितं भूत्वा सामाजिकविषये चिन्तयन्ति अपितु दीर्घसमयपर्यन्तम् एकत्र निवसन्ति कर्म च कुर्वन्ति।"

फेयर-चाइल्ड इत्यस्यमतानुसारेण - "समाजोऽस्ति व्यक्तिनाम् ईदृशः समूहो यत्र स्वस्य हितविषयाः यथा – स्वस्य रक्षा, भरण-पोषणं, स्थायित्वप्रदानञ्चेति सम्मिलिताः भवन्ति। तथा च एतेषां करणार्थं सहयोगं कृतवन्तः"।

उपर्युक्तासु सर्वासु परिभाषासु समाजं समूहरूपेण चित्रितमस्ति। मानवाः स्वस्य प्रयोजनस्य निवृत्त्यर्थं इतरेण मानवेन सह अन्तःक्रियां कृतवन्तः, सामाजिकसम्बन्धञ्च स्थापितवन्तः। अनेन सम्बन्धधारेण मानवैः सह व्यवहारं कुर्वन्ति। तथा च क्रिया-प्रतिक्रियामपि कुर्वन्ति। एते व्यवहारा निश्चितनियमाधारेण भवन्ति। एभिः सह पारस्परिकापेक्षाः अपि सम्मिलिताः भवन्ति। एतेषां सर्वेषां सम्मिलितेन यस्य व्यवस्थाया उत्पत्तिर्भवति तद्व्यवस्था एव समाज इति उच्यते। मैकाईवर-पेज इतीमौ समाजं सामाजिकसम्बन्धस्य जालरूपेण परिभाषितवन्तौ।

❖ **रामायणकाले समाजस्य प्रचलिताः विश्वासाः –**

आदिममानवाः अनेकाः क्रिया धारणा च न जानन्ति। ते प्रचलनस्य हेतोः ताः स्वीकुर्वन्ति। अस्य कारणं हि अतीते प्रथा-परम्परेत्यादीन् धर्मस्य प्रमुखसाधनरूपेण स्वीकुर्वन्ति। कदापि धार्मिकग्रन्थस्य निर्धारितसिद्धान्तेऽपि अस्य उल्लेखो वर्तते। डा. अल्केतर इत्यस्यमतानुसारेण सदाचारः समाजस्य प्रचलितप्रथायाः विस्वासात् च जायते। अतः परम्परा हि प्रारम्भिककाले प्रमुखरूपेण शक्तिशाली आसीत्। तथा च तस्याः पालनं विना विचारः कृत आसीत्। अस्य कारणं हि अस्य उत्पत्ति अनादिकालात् इति स्वीकृता। मानवानां समाजीकरणस्य प्रवृत्त्या तथा च अनुकरणस्य रूच्या तेषां व्यवहारे एकरूपताया उत्पत्तिरारब्धा। या अग्रे लोककथा-परम्परादिरूपेण परिगणिता। लोककथायां विश्वासस्य शक्तिरस्ति। विश्वास्योपरि लोककथा आधारिता। याः विभिन्नेषु कार्येषु प्रेरयन्ति। रामायणे लोककथायाः विश्वासस्य च व्यवस्थापितं विवेचनं कृतम् अस्ति।

कदापि रीत्याः प्रयोगो लोककथारूपेण अस्ति। परन्तु रीति-लोककथोभयोर्मध्ये भेदोऽस्ति। लोककथायाः पालनेन स्थाने स्थाने कदाचित् भिन्नतां लक्ष्यीक्रियते। लोककथायाः पालनस्य पद्धतिर्रीतिरित्युच्यते। कुत्रापि नियमं लोककथाया अर्थरूपेण प्रयोगोऽस्ति परन्तु एषोऽनुचितः। यतो निश्चितसिद्धान्तो यः परम्परारूपेण पालितो भवति स एव नियम इत्युच्यते। यद्यपि परम्परया सह अस्य सम्बन्धोऽस्ति। परन्तु अनयोर्मध्ये किञ्चिद् भेदोऽस्ति।

रामायणे अस्ति गङ्गाया जलं पवित्रं तथा च पुण्यफलं प्रददाति। ब्रह्मा सगरम् उक्तवान् – त्वं स्वयं गङ्गायां स्नानं कृत्वा पवित्रं भूत्वा पुण्यफलं प्राप्नोसि। अतोऽयं विश्वासोऽस्ति गङ्गास्नानेन पुण्यफलस्य प्राप्तिर्भवति। मन्यते यत् परदेशाद् आगन्तुकस्य अभ्यर्थना ब्राह्मणकन्याः पुण्यफलस्य इच्छया कुर्वन्ति। अतः कौशल्याभिः कामना कृता – यदा रामादीनां अयोध्यायां पुनरागमणं भविष्यति, तदा प्रसन्नतापूर्वकं ब्राह्मणकन्याभिः पुष्पवर्षणेन रामादयः अयोध्यायाः परिक्रमणं करिष्यन्ति। जनानाम् एषो विश्वासोऽपि आसीद् मानवाः मरणात् परं यमलोकं गच्छन्ति, तत्र तेषां कर्मानुसारेण स्वर्गलोकसेय प्राप्तिर्भवति। तस्मिन् समये ईदृशो विश्वासोऽपि आसीद् – भूमिदानं, पत्नीव्रतः, अग्निहोत्रादिना कर्मना मानवाः सद्गतिंप्राप्नुवन्ति।

अनेन विवरणेन वक्तुं शक्यते – सामाजिकजीवने अनेका लोककथा आसन्, येषां प्रभावः समाजे प्रभूतरूपेण आसीत्।

❖ **भारतीयसमाजे रामायणस्य प्रभावः –**

रामायणं समग्रजातीः तथा मानवान् निकषा यथार्थोच्चादर्शस्य एकः परिपूर्णो जीवन्तः चित्रकल्पो विचारधारा वा। अतो दरिद्रस्य जीर्णकुटिराद् धनवन्तो राजप्रासादपर्यन्तं सर्वत्र श्रद्धया रामायणस्य पाठो भवति। जीवनस्य सर्वक्षेत्रे सर्वेषां किमादर्शो भवेत् तस्मिन् विषये बाल्मीकिना रामायणे विस्तारितभावेन आलोचना कृता अस्ति। रामायणे भारतीयादर्शस्य यथार्थः परिचयोऽस्ति। एतद् वक्तुं शक्यते – आदिकविना बाल्मीकिना रामायणे येषां चरित्राणां वर्णना कृता, तानि चरित्राणि भारतीयादर्शस्य उत्कृष्टोदाहरणानि। बाल्मीकिना स्वकाव्ये ईदृशो नायको निर्वाचितः, यो मानवरूपेणापि सर्वगुणसम्पन्नः सर्वादर्शस्य च मूर्तः प्रतीकः। तस्य स्वधर्मः, पितृभक्तिः, सत्यनिष्ठा, त्यागः, वीरत्वं, सदा प्रजानां मङ्गलकामना च इत्यादिभिर्गुणैः अद्यापि मानवानां समीपे देवतारूपेण पूजितो भवति। वक्तुं शक्यते तस्य उपमा स्वयमेव। अस्य गुणस्य आदर्शस्य च हेतोर्भारतीयसमाजे रामस्य प्रभावोऽस्ति। अत्र नास्ति कोऽपि संशयः। अपितु उत्तरभारते पारस्परिके सम्भाषणे 'राम-राम' इति शब्दस्य

उच्चारणं करोति। रामचन्द्रस्य उच्चादर्शस्य हेतो अद्यापि मानवाः रामराज्यस्य कल्पनां कुर्वन्ति। रामायणे **बाल्मीकिना उक्तम् –**

**"धर्मादर्थः प्रभवति धर्मात्प्रभवते सुखम्।**

**धर्मेण लभते सर्वं धर्मसारमिदं जगत्।।"**[१]

जीवनस्य समृद्धाय पवित्राय च कर्मणः मुख्यलक्ष्यं भवेत्। अर्थ-काम-मोक्षादयो धर्मस्य अविरोधिनो धर्मभित्तिकाः च भवेयुः। यतो धर्मेण जगतः सर्वं लब्धुं शक्यते।

अस्माकम् आदर्शराज्यं रामराज्यम्। तदादर्शस्य विषये बाल्मीकिना रामायणे वर्णना कृता अस्ति। अर्थात् राज्ञः कर्तव्यविषये रामायणेऽस्ति–

**"रक्षिता जीवलोकस्य स्वजनस्य च रक्षिता।**

**रक्षिता स्वस्य वृत्तस्य धर्मस्य च परंतपः।।"**[२]

बाल्मीकिना मते सदाचारः, शत्रुदमनं, प्रजापालनं, देश-जाति-धर्मादीनां च रक्षा एव आदर्शस्य राज्ञो राजधर्मः। अर्थात् राजा धर्मेनैव प्राणीनां रक्षां करोति। आदर्शराजधर्मस्य प्रतीको रामचन्द्रः। रामो न केवलम् आदर्शो राजा, अपितु स्वस्य पितृभक्त्या, भातृन प्रति प्रेम्ना, सत्येन, निष्ठाया, संयमेन, धैर्येण, पौरुषेण, त्यागेन च भारतीयानां हृदये स्थानं कृतवान्। वस्तुतो रामचन्द्रः सर्वेषां मानविकगुणानाम् आधारः।

महर्षिर्बाल्मीकिर्रामायणस्य अयोध्याकाण्डे राज्ञो दायित्व-कर्तव्यादीन् अस्माकं समीपे उपस्थापितवान्। रामचन्द्रस्य मध्ये ते सर्वे गुणाः सन्ति।

बाल्मीकिना उक्तम् –

**"राजा सत्यञ्च धर्मञ्च राजा कुलवतां कुलम्।**

**राजा माता पिता चैव राजा हितोकर नृणाम्।।"**[३]

रामराज्यमिति शब्दश्रवणेन अस्माकं मनसि ईदृशं चित्रम् उपस्थापितं यत्र संघर्ष-विद्वेष- साम्प्रदायिकता-निष्ठुरता-नरवलीत्यादिघटना नास्ति। यत्र केवलं धर्मेण प्रजाकल्याणाय नित्यानन्दः प्रतिष्ठितोऽस्ति। राजा सत्यस्य धर्मस्य च प्रतिनिधिः, स राजा एव प्रजाणां कल्याणकारी तेषां पितरौ सदृशौ। अतो रामराज्यम् एव आदर्शराज्यम्, अस्मिन विषये नास्ति सन्देहस्य अवकाशः। अनेन कारणेन स्वाधीनभारते महात्मागान्धी रामराज्यप्रतिष्ठामाध्यमेण यथार्थगणतन्त्रस्य प्रतिष्ठायै चेष्टाम् अकरोत्। जीवनस्य प्रतिक्षेत्रे किमादर्शो भवेद्, महर्षिर्बाल्मीकिर्रामायणे तद्विषयं निर्देशितवान्।

नारीणां आदर्शविषये रामायणे नाना कथाः सन्ति। सीता सतीत्वं, पतिभक्तिः, त्यागः, सहिष्णुता इति गुणैः भारतीयनारीणां मनसि उत्कृष्टस्थानं प्राप्तवती। बाल्मीकिना रामायणे यौथपरिवारस्य यस्य प्रेम्नः त्यागस्य च आदर्शः उपस्थापितः। तद्यथापि वयं गृहिणः सर्वदा स्मरणं कुर्वन्ति। पितरं प्रति पुत्रस्य, भ्रातरं प्रति भ्रातुः, पतिं प्रति पत्न्याः ये दायित्व-कर्तव्य-सम्मानादय आवश्यकाः, ते सर्वे बाल्मीकिना रामायणे उपस्थापिता। अपितु सीतायाः धैर्यं, लक्ष्मणस्य भ्रातृभक्तिः, भरतस्य आत्मत्यागः, कौशल्यायाः आत्मसंयमः, सुमित्रायाः त्यागः धैर्यञ्च, हनुमतः प्रभुभक्तिः सेवा च, विभिषणस्य सौहार्द्यं, रामस्य वीरत्वं महत्वञ्च इत्यादीनां विविधानां चरित्राणां विविधाः गुणावल्यादयः सर्वान् भारतीयान् निकषा अनुसरणयोग्याः नैतिकानुप्रेरणादायकाः च।

अतः परिशेषे वक्तुं शक्यते – जीवनं सुन्दराय सार्थकाय च ये गुणाः आवश्यकाः सन्ति ते सर्वे बाल्मीकिना निन्मोक्ते श्लोके उपस्थापिताः –

**"सत्यञ्च धर्मञ्च पराक्रमञ्च भूतानुकम्पां प्रियवादीनाञ्च।**

**द्वीजातिदेवातिथिपूजनञ्च पन्थानमाहुस्त्रिदिवस्य सन्तः।।"**

## ❖ निष्कर्षः –

आदिकवेर्बाल्मीकेर्रामायणस्य प्रभाव उत्तरकालस्य कवीनां चिन्तायां परिलक्षितो जातः। अतो विविधेषु काव्येषु रामायणस्य प्रभावो लक्षिक्रियते। रामायणे वर्णिताः पितरं प्रति पुत्रस्य भक्तिः, भ्रातरं प्रति भ्रातुः प्रेम, पतिं प्रति पत्न्याः कर्तव्यादयोऽद्यापि भारतीयान् निकषा आदर्शरूपेण परिलक्षिताः जाताः। समग्रपर्यालोचनां कृत्वा इदं वक्तुं शक्यते – भारतीयसमाजजीवने, राष्ट्रजीवने, धर्मे, साहित्ये, संस्कृत्यां, दर्शने च सर्वत्र एव रामायणस्य प्रभावोऽस्ति। बाल्मीकिं प्रति ब्रह्मण आशीर्वादः –

**"यावत् स्थास्यन्ति गिरयः सरितश्च महीतले।**

**तावद् रामायणकथा लोकेषु प्रचरिष्यति।।"**

(बाल्मीकिरामायणम्- १/२/३६)

अर्थात् यावद् अस्यां पृथिव्यां पर्वताः नद्यश्च स्थास्यन्ति तावद् रामायणस्य कथा लोकेषु प्रचारिता, प्रसारिता विराजमाना च भविष्यति। अस्य रामायणस्य आदर्श आबाल्याद् अस्माकं चरित्रगठणाय साहाय्यं करोति। तथा च वृद्धकाले धर्मार्जनस्य उत्सरूपेण कार्यं करोति। रामायणमिदम् अस्माकं परिवारस्य सदस्येषु समग्रसमाजेषु परस्परं सुसम्पर्कस्थापनाय साहाय्यं करोति।

## ❖ ग्रन्थसूची –


१. बाल्मीकिरामायणम्, गीताप्रेस्, गोरखपुरम् – २०२३

२. आधुनिक सामाजिक मनोविज्ञान, डॉं. आर.एन.सिंहः, श्रीविनोद पुस्तक मन्दिरम्, आगरा – २०२०

३. बाल्मीकिरामायणम्, रामानुज गोविन्दः, दिल्ली, नाग पाब्लिकेशनस् – २०१२

४. संस्कृत साहित्येर इतिहास, धीरेन्द्रनाथ वन्द्योपाध्यायः, कोलकाता, पश्चिमवङ्ग राज्य पुस्तक पर्षद् – १९८८


## ❖ पाद टिप्पणी –

[१] बाल्मीकिरामायणम्- ३/९/३१

[२] बाल्मीकिरामायणम्- ५/३५/१०

[३] बाल्मीकिरामायणम्- २/६७/३४